2026

SANSKRIT

(Major)

Paper : SAN4400204MJ

Anandaram Dhekial Phookan College Library * Acc. No. Date * Nagaon : Assam

(Sanskrit Prose and Poetry)

Full Marks : 60

Time : 2½ hours

The figures in the margin indicate full marks for the questions.

UNIT—I

(Daśakumāracaritam / दशकुमारचरितम्)

(*Marks* : 15)

1. Answer the following questions : 1×3=3

अधोलिखितप्रश्नानाम् उत्तरं प्रदेयम्—

(a) Who was विश्रुतः?

विश्रुतः कः आसीत्?

(b) ''को वा भवान्, कथं चेयमापदापन्ना''

Who is the speaker here?

अत्र वक्ता कः?

(c) Who was पुण्यवर्मा?
पुण्यवर्मा कः आसीत्?

2. ''अधीष्व तावद्दण्डनीतिम्''

Who is the speaker here? To whom was it spoken? 2
अत्र वक्ता कः? कमुद्दिश्य एतदुक्तम्?

Or / अथवा

How many types of राजविद्याs are there? What are those राजविद्याs?
राजविद्याः कतिविधाः? काः वा एताः राजविद्याः?

3. Write a note on the advice of Vasurakṣita given to Anantavarmā as it is described in the 8th Ucchvāsa of the book, *Daśakumāracaritam.* 10
'दशकुमारचरितम्' इति ग्रन्थस्य अष्टमोच्छ्वासे प्राप्तवर्णनानुसारेण वसुरक्षितेन अनन्तवर्माणं प्रति प्रदत्तोपदेशस्य विषये एका टिप्पणी लेखनीया।

Or / अथवा

Write a note on the contribution of Daṇḍin to Sanskrit literature.
संस्कृतसाहित्ये दण्डिनः अवदानविषये एका टिप्पणी लेखनीया।

UNIT—II

(Kādambarī / कादम्बरी)

(*Marks* : 15)

4. Who was चन्द्रापीडः? 1
चन्द्रापीडः कः आसीत्?

5. Answer any *two* of the following questions : 2×2=4
अधोलिखितप्रश्नानां प्रश्नद्वयस्योत्तरं प्रदेयम्—

(a) Who was शुकनासः? To whom advice was given by him?
शुकनासः कः आसीत्? तेन कः उपदिष्टः?

(b) *Kādambarī* belongs to which category of Sanskrit prose literature? Who completed the last part of *Kādambarī*?
'कादम्बरी' संस्कृतगद्यकाव्यस्य कस्मिन् विभागे अन्तर्गता अस्ति? कादम्बर्याः अन्तिमभागः केन विरचितः?

(c) ''अतिगहनं तमो यौवनप्रभवम्''
Who is the speaker here? To whom was it spoken?
अत्र वक्ता कः? कं प्रति इदमुक्तमासीत्?

Jagiram Dhekial Phookan College Library Acc. No. Date Nagaon, Assam

6. Translate into English *or* Assamese any *one* of the following : 5

निम्नलिखितयोः एकस्य आङ्गलभाषया असमीयाभाषया वा अनुवादः करणीयः —

(a) विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलञ्च निसर्गत एवाभानुभेद्यमरत्नालोकच्छेद्यमप्रदीपप्रभापनेयमतिगहनं तमो यौवनप्रभवम्।

(b) सततममूलमन्त्रशाम्यो विषमो विषयविषास्वादमोहः। नित्यमस्नानशौचबाध्यः बलवान् रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीत्यतो विस्तरेणाभिधीयसे।

7. Elucidate any *one* of the following : 5

निम्नलिखितयोः एकस्य भावार्थः लिख्यताम्—

(a) अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः।

(b) अहंकारदाहज्वरमूर्छान्धकारिता विह्वला हि राजप्रकृतिः।

UNIT—III

(Raghuvaṁśam—Canto IV / रघुवंशम्—चतुर्थः सर्गः)

(*Marks* : 15)

8. How many Cantos are there in the epic, *Raghuvaṁśam*? 1

'रघुवंशम्' इति महाकाव्ये कति सर्गाः सन्ति?

(Continued)

Dhekial Phookan College Library Acc. No. Date Assam

9. Answer any *two* of the following questions : 2×2=4

अधोलिखितप्रश्नानां द्वयस्योत्तरं प्रदेयम्—

(a) ''पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः''

Write the names of the पञ्चभूत्s referred to in this line.

अस्यां पंक्तौ उल्लिखितानां पञ्चभूतानां नामानि लिख्यन्ताम्।

(b) ''पुण्डरीकातपत्रस्तं विकसत्काशचामरः''

Write Sanskrit synonyms of the words 'पुण्डरीकम्' and 'आतपत्रः'.

'पुण्डरीकम्' तथा 'आतपत्रः' इति शब्दयोः समानार्थकः संस्कृतशब्दः प्रदेयः।

(c) ''षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया''

Write the names of the six types of बल्स (soldiers).

षड्विधबलानां (सैन्यानां) नामानि लिख्यन्ताम्।

10. Explain any **one** of the following verses : 5

अधोलिखितश्लोकयोः एकतरस्य व्याख्या कार्या: —

(a) मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः॥

(b) मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद् वसुन्धरा॥

(Turn Over)

11. Elucidate (any *one*) : 5

भावार्थः लेखनीयः (**एकतरस्य**) :

(a) राजा प्रकृतिरञ्जनात्।

(b) प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम्।

UNIT—IV

(Kirātārjunīyam—Canto I / किरातार्जुनीयम्—प्रथमः सर्गः)

(*Marks* : 15)

12. Answer the following questions : 1×3=3

अधोलिखितप्रश्नानाम् उत्तरं प्रदेयम्—

(a) How many Cantos are there in the epic, *Kirātārjunīyam*?

'किरातार्जुनीयम्' इति महाकाव्ये कति सर्गाः सन्ति?

(b) ''नारिकेलफलसम्मितं _____ भारवेः।''

Fill in the blank.

रिक्तस्थानं पूरयतु।

(c) ''न विव्यथे तस्य मनो''

Who is referred to here as 'तस्य'?

अत्र 'तस्य' इत्यनेन कः सूच्यते?

(*Continued*)

13. वरं _____ समं _____।

Fill in the blanks. 2

रिक्तस्थाने पूरयतु।

Or / अथवा

''अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः''

Who is the speaker here? To whom was it said?

अत्र वक्ता कः? कस्मै इदमुक्तम्?

14. Answer any *one* of the following questions : 10

अधोलिखितप्रश्नानां मध्ये **एकस्य** प्रश्नस्योत्तरं प्रदेयम्—

(a) Reproduce in your own words the speech of वनेचरः as it is depicted in the 1st Canto of the epic, *Kirātārjunīyam*.

'किरातार्जुनीयम्' इति महाकाव्यस्य प्रथमसर्गे वर्णितं वनेचरस्य वक्तव्यं स्वकीयभाषया उपस्थापयतु।

(b) Prepare a note on the literary style of Bhāravi.

भारवेः रचनाशैलीमधिकृत्य एका टिप्पणी विरचनीया।

(c) Reproduce in your own words the speech of Draupadī as per the description found in the 1st Canto of the epic, *Kirātārjunīyam*.

'किरातार्जुनीयम्' इति महाकाव्यस्य प्रथमसर्गे उपलब्ध-वर्णनानुसारेण द्रौपद्याः उक्तिः स्वकीयभाषया उपस्थापनीया।

★ ★ ★

Nagaon Dhekial Phookan College Library * Acc. No. Date * Nagaon : Assam *